# संस्कृतम्

| अधिगम-प्रतिफलानि | उपयुक्तानि संसाधनानि | प्रस्ताविताः गतिविधयः (शिक्षकाणामभिभावकानाम् वा साहायेन विधेयाः) |
| --- | --- | --- |
| • विद्यार्थी सरलसंस्कृतभाषया कक्षोपयोगीनि वाक्यानि वक्तुं समर्थः अस्ति।<br>• विद्यार्थी कक्षातः बहिः दैनन्दिन-जीवनोपयोगीनि वाक्यानि वदति।<br>• प्रश्नि-आश्चर्य-उत्साह-दुःख-विनम्रताऽऽदीन् भावान् संस्कृतभाषया वदति लिखति च। | • एनसीईआरटीद्वारा अथवा राज्यद्वारा निर्मितानि पाठ्यपुस्तकानि, गृहे उपलब्धाः पठनलेखनसामग्र्यः अन्यदृश्यश्रव्यसामग्र्यः यथा इंटरनेट-वेबसाइट, रेडिओदूरदर्शनादिषु उपलभ्यन्ते। | **सप्ताहः –पंचमः**<br>**श्रवणसम्भाषणकौशले**<br>1. शिक्षणक्रमे शिक्षकः सरल-संस्कृत-वाक्यानां प्रयोगं कुर्यात्। छात्राणामवबोधनं श्रवणकौशलम् च परीक्षितुं मध्येमध्ये प्रश्नान् पृच्छेत्। संस्कृतभाषावबोधनसमये छात्रैः काठिन्यमनुभूयते चेत् मध्येमध्ये हिन्दीभाषायाः क्षेत्रियभाषायाः अपि प्रयोगः करणीयः।<br>**उदाहरणम् -**<br>बालः –सुप्रभातम्। महोदये! किम् अहम् अन्तः आगन्तुं शक्नोमि?<br>शिक्षिका –आम्। आगच्छ।<br>प्रियंका - क्षम्यतां महोदये!, अहम् इमं श्लोकं सम्यक् रूपेण न<br>2. अवगच्छामि। कृपया पुनः एकबारं बोधयतु।<br>शिक्षिका –अस्तु, पुनः एकवारं बोधयामि।<br>प्रियंका - महोदये! अधुना श्लोकार्थः स्पष्टः। धन्यवादः।<br>3. शिक्षिका प्रारम्भे छात्रान् दैनन्दिन-जीवनोपयोगिनः प्रश्नान् पृच्छेत्।<br>यथा –अद्य गृहे पित्रा सह कीदृशः वार्तालापः कृतः?<br>पितः! मम गणवेशं पुरातनं जातम्। कृपया मह्यं नूतनं गणवेशं दापयतु।<br>4. इण्टरनेट्मध्ये उपलब्धानि संस्कृतगीतानाम् श्रवणम् भवेत् |
| • अपठितगद्यांशं पठित्वा तदाधारितप्रश्नाना मुत्तरप्रदाने सक्षमः अस्ति। | | **सप्ताहः –षष्ठः**<br>**(पूर्वसप्ताहनाम्गतिविधिभिःसह)**<br>**पठनलेखनकौशले**<br>पाठ्यपुस्तकेतर-साहित्येभ्यः स्तरानुकूलं कथाः निबन्धान् च संगृह्य सप्ताहे एकवारं पठितुं छात्रान् निर्दिशेत्। तदाधारित-प्रश्नान् पृच्छेत्, चर्चां कुर्यात्। एवं संस्कृतमयवातावरणनिर्माणं कुर्यात्। छात्राणामधिकाधिकी सहभागिता भवेदिति सुनिश्चितं कुर्यात्।<br>यथा -<br>स्वच्छताअस्माकंजीवनेअत्यावश्यकी।यदिवयंगृहेआपणेमार्गेविद्यालयेकार्यालयादिषुस्थानेषुजीवनव्यवहारेसर्वथास्वच्छतांपालयामः, वयंस्वस्थाःभवामः। स्वस्थशरीरस्यमनसःचकृतेस्वच्छतामहत्त्वपूर्णंस्थानंभजते। स्वस्थेचशरीरेस्वस्थंमनःनिवसति, स्वस्थेचमनसिवयंसत्कर्मणिप्रवृत्ताःभवामः। |

| | | |
|---|---|---|
| • सरल-संस्कृत-भाषया औपचारिक-अनौपचारिक-पत्रलेखनार्हः भवति। | | **सप्ताहः –सप्तमः**<br>औपचारिक-अनौपचारिक-पत्राणां प्रारूपं पदाय विषयगत-चर्चां च विधाय छात्रैः पूर्णं पत्रं लेखयेत्, अशुद्धीनां च संशोधनं कृत्वा पुनः बोधयेत्। छात्रैः तेषां पत्राणां कक्षायां प्रस्तुतिं कारयेत्। अनन्तरं तेषां प्रतिपुष्टिं प्रदद्यात्।<br>यथा - अवकाशार्थं प्रधानाचार्यं प्रति पत्रम्, जिलाधिकारिणं प्रति पत्रम् इत्यादीनि (औपचारिकपत्रम्)<br>मित्रस्य कृते पत्रम्। पुत्रस्य पितरं प्रति पत्रम् इत्यादीनि। (अनौपचारिकपत्रम्) |
| • अनुच्छेद-लेखनं, संवाद-लेखनं चित्राधारित-वर्णनञ्च करोति। | | **सप्ताहः –अष्टमः**<br>शिक्षकः कम् अपि विषयम् अवलम्ब्य प्रतिछात्रम् एकैकं वाक्यं रचयितुं कथयेत्। तानि वाक्यानि संकलय्य सार्थकम् अनुच्छेदं सज्जीकुर्यात्। एवं संस्कृतमयवातावरणे कक्षायां संवादवाचनस्य अनुच्छेदलेखनस्य च अभ्यासं कारयेत्।<br>यथा – कोरोना-प्रतीकारः, पर्यावरणं संरक्षणम्, स्वच्छभारतम्, विद्यायाः महत्त्वम् इत्यादयः।<br>1. कामपि परिस्थितिं मनसि निधाय कांश्चन प्रश्नान् पृष्ट्वा संवादाय उत्तरप्रदानाय च निर्दिशेत्। छात्राणाम् उत्तराणि च संशोध्य संवादालेखनं कारयेत्। यथा – छात्रशिक्षकयोः वार्तालापः, मित्र-संवादः इत्यादयः।<br>2. संवादशैलीम् अनुकर्तुं दूरदर्शने आकाशवाण्याञ्च संस्कृत-समाचारं श्रोतुं द्रष्टुं च निर्दिशेत्।<br>3. कानिचन चित्राणि दर्शयित्वा तद्विषये वक्तुं लेखितुं च छात्रान् आदिशेत्। अशुद्धीनां च संशोधनं कृत्वा पुनः लेखितुं निर्दिशेत्। |
| • पाठ्यपुस्तकगतान् गद्यपाठान् अवबुध्य तेषां सारांशं वक्तुं लिखितुं च समर्थः अस्ति।<br>• तदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतेन वदति लिखति च। | | **सप्ताहः –नवमः**<br>**पठनलेखनश्रवणसम्भाषणकौशलानि**<br>कथादयः गद्यपाठाः यथासंभवं प्रत्यक्षविधिना पाठनीयाः।<br>शिक्षकेण आदर्शवाचनं, छात्रैः व्यक्तिगतरूपेण समूहे वा अनुवाचनम्, अपरिचितपदानाम् अर्थावबोधनम्, पाठस्य भावावबोधनं च। छात्राणाम् अवबोधं परीक्षितुं मध्ये मध्ये प्रश्नाः अपि प्रष्टव्याः। छात्रैः पाठस्य सारांशः संस्कृतेन स्वभाषया वा प्रस्तोतव्यः। शिक्षकः यथास्थानं संशोधनं कारयेत्।<br>पाठनप्रसंगे केचन एतादृशाः अपि प्रश्नाः प्रष्टुं शक्यन्ते येन छात्राः चिन्तनार्थं अवसरं लभेरन्, विचार्य ते निष्कर्षमवाप्नुयुः,<br>यथा –भवान् अस्यां परिस्थितौ भवेत् चेत् किं कुर्यात्? पाठस्य नायकेन नायिकया वा यः निर्णयः गृहीतः किं स एव निर्णयः समीचीनो वा?<br>यथा -पाठस्यनाम – 'बुद्धिर्वलवतीसदा'। |



| | | |
|---|---|---|
| • संस्कृतश्लोकान् उचित-बलाघात-पूर्वकं छन्दोनुगुणम् उच्चारयति।<br>• श्लोके प्रयुक्तानां सन्धियुक्तपदानां विच्छेदं करोति।<br>• श्लोकान्वयं कर्तुं समर्थः अस्ति।<br>• तेषां भावार्थं प्रकटयति।<br>• श्लोकाधारितानां प्रश्नानाम् उत्तराणि संस्कृतेन वदति लिखति च।<br><br>• संस्कृत-नाट्यांशानां संवादानां उचितोच्चारणं करोति।<br>• तेषां भावानुरूपं शारीरिकक्रियाकलापान् प्रदर्शयति।<br>• तदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतेन वदति लिखति च। | | प्रश्नः –<br>1. बुद्धिमत्याःप्रत्युत्पन्नमतित्वंसंस्कृतेनस्वभाषयावावर्णयत।<br>2. 'बुद्धिर्वलवती सदा' इति अस्य पाठस्य सन्देशं लिखत।<br><br>**सप्ताहः –दशमः**<br>**पठनलेखनश्रवणसम्भाषणव्याकरणकौशलानि**<br>1. संस्कृतश्लोकानां गीतानां वा पाठनसमये शिक्षकः सस्वरवाचनं कुर्यात्। अथ्वा ई-सामग्रीणाम् उपयोगम् कुर्यात्। यदा कदा व्यक्तिगतरूपेण समूहे वा अनुवाचनं कारयेत्। छात्राः स्खलनं कुर्वन्ति चेत् प्रेम्णा शनैः शनैः दोषाः अपसारणीयाः।<br>2. क्लिष्टानां पदानाम् अर्थं बोधयेत्, सन्धियुक्तपदानां विच्छेदं कुर्यात् कारतेत् च, श्लोकानाम् अन्वयपूर्वकम् अर्थं बोधयेत् च। छात्राणाम् अवबोधं परीक्षितुं मध्येमध्ये प्रश्नाः अपि प्रष्टव्याः।<br>3. संस्कृतसाहित्ये समुपलब्ध-नैतिक-सामाजिक-मूल्यान्याधृत्य स्वकीयान् विचारान् प्रकटयितुं निर्दिशेत्।<br>4. छात्रैः पाठस्य सारांशः संस्कृतेन स्वभाषया वा प्रस्तोतव्यः। शिक्षकः यथास्थानं संशोधनं कारयेत्। पाठनप्रसंगे केचन एतादृशाः अपि प्रश्नाः प्रष्टुं शक्यन्ते येन छात्राः चिन्तनार्थं अवसरं लभेरन्।<br>यथा - पाठस्य नाम – 'सूक्तयः'<br>त्वक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।<br>परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥<br>पदच्छेदः–यः+अभि + उदीरयेत्<br>भुङ्क्ते + अपक्वम्<br>अन्वयः–यः धर्मप्रदां वाचं त्यक्त्वा परुषां वाचम् अभ्युदीरयेत् सः विमूढधीः पक्वं फलं परित्यज्य अपक्वं भुङ्क्ते।<br>भावार्थः–मनुष्यः सदा मधुरां वाचं वदेत्।<br>प्रश्नः–पुरुषः कीदृशीं वाचं वदेत्?<br><br>**सप्ताहः –एकादशः**<br>**पठनलेखनश्रवणसम्भाषणव्याकरणकौशलानि**<br>1. नाटक-संवादादीन् पाठान् साभिनयं पाठयेत्। छात्राः अपि पात्रानुसारम् अभिनयं कुर्युः। सर्वेषां छात्राणां नाटकप्रस्तुतीकरणे सहभागिता भवेत्, तदर्थं तेषां पात्रसंख्यानुसारं समूहेषु विभजनं क्रियेत।<br>2. पुस्तकादतिरिच्य सहायकसामग्रिरूपेण दृश्यश्रव्यसामग्र्यः प्रयोक्तव्याः। |

| | | |
|---|---|---|
| • प्रश्नि-आश्चर्य-उत्साह-दुःख-विनम्रताऽऽदीन् भावान् संस्कृतभाषया वदति लिखति च। | | 3. छात्रैः पाठस्य सारांशः संस्कृतेन स्वभाषया वा प्रस्तोतव्यः। शिक्षकः यथास्थानं संशोधनं कारयेत्। पाठनप्रसंगे केचन एतादृशाः अपि प्रश्नाः प्रष्टुं शक्यन्ते येन छात्राः चिन्तनार्थं अवसरं लभेरन्।<br>4. क्लिष्टानां पदानाम् अर्थं बोधयेत्, सन्धियुक्तपदानां विच्छेदं कारयेत्, सप्रसंगम् अर्थं बोधयेत् च। छात्राणाम् अवबोधं परीक्षितुं मध्येमध्ये प्रश्नाः अपि प्रष्टव्याः।<br>पाठस्य नाम –'शिशुलालनम्'।<br>प्रश्नः –<br>(i) नाट्यांशोऽयं कस्मात् ग्रन्थात् स्वीकृतः?<br>(ii) नाट्यांशेऽस्मिन् "निरनुक्रोश" इति पदं कस्मै प्रयुक्तम्?<br>5. शिक्षकः सहायकसामग्रिरूपेण नाटकादि-दृश्यश्रव्यसामग्रीं, भित्तिपत्रं, कक्षायां स्फोरकपत्रेषु लिखितानि आर्षवाक्यानि, पाठाधारितानि स्फोरकपत्राणि इत्यादीनि शिक्षणसमये प्रयोजयेत् अभ्यासं च कारयेत्, तद्यथा-<br>(i) भवान् कुत्र गच्छति?<br>(ii) पश्य भो! कियान् विशालवृक्षः!<br>(iii) अहो! कियत् मनोहरं दृश्यम्!<br>(iv) वयं निश्चयेन पर्वतारोहणं करिष्यामः।<br>(v) अहा महत् कष्टम्, किमिदं घोरम् आपतितम्?<br>(vi) मित्र! कृपया मम साहाय्यं करोतु।<br>(vii) मह्यं दिनत्रयस्य अवकाशं प्रदाय अनुगृह्णातु।<br>(viii) धन्यवादः।<br>(ix) अनुगृहीतोऽस्मि। |
| • कारक-विभक्ति-उपपदविभक्तीः प्रयुज्य शुद्धवाक्यानि रचयति।<br>• सन्धियुक्तपदानां सार्थकविच्छेदं विच्छेदयुक्तपदानां सन्धिं च करोति।<br>• कृदन्तु-तद्धित-स्त्री-प्रत्ययान् प्रयुज्य वाक्यानि रचयति।<br>• उपसर्गयुक्तपदानि वाक्येषु व्यवहरति। | | **सप्ताहः –द्वादशः**<br>**पठनलेखनश्रवणसम्भाषणव्याकरणकौशलैः सह व्याकरणाभ्यासः**<br>1. व्याकरणनियमानां स्वतन्त्रतया पाठनं न करणीयम्। गद्य-पद्य-नाटकादिषु आगतानां व्याकरणबिन्दूनां बोधः कार्यः। तत्रैव समानैः उदाहरणैः अभ्यासं कारयित्वा छात्रैः विविधप्रयोगान् कर्तुं निर्दिशेत्। कण्ठस्थीकरणापेक्षया अवबोधनोपरि बलं दातव्यम्। समधिकैः उदाहरणैः छात्राः स्वयं वाक्यसंरचनाकौशलं प्राप्नुवन्तु इत्येवं लक्ष्यं स्यात्।<br>2. समानप्रकृतिकैः अनेकैरुदाहरणैः कारकविभक्तीनाम् उपपदविभक्तीनां च विशिष्टप्रयोगान् सूचयेत्। शिक्षणसमये नैकान्युदाहरणानि प्रदातव्यानि येन छात्राः स्वयमेव शुद्धप्रयोगं जानीयुः, तद्यथा – |



| | | |
|---|---|---|
| • पाठे प्रयुक्तानां सामसिकपदानां विग्रहं विगृहीतपदानां समस्तपदानि च लिखन्ति।<br>• पाठ्यपुस्तकगत-पाठानां स्रोतः रचनाकाराणां नामानि च अभिव्यनक्ति।<br>• अर्थानुसारं वाच्यपरिवर्तनं (कर्तृवाच्यम्, कर्मवाच्यम् एवं भाववाच्यम्) करोति।<br>• समयवाचकप्रश्ने पृष्टे सति समुचितमुत्तरं यच्छति।<br>• उचिताव्ययान् प्रयोजयन्तः वाक्यनिर्माणं करोति।<br>• विभक्ति-वचन-काल-लिंगानां बोधपूर्वकं प्रयोगं कुर्वन्ति। | | सः **गृहं** प्रति गच्छति।<br>**ग्रामं** परितः वृक्षाः सन्ति।<br>**विद्यालयम्** उभयतः मार्गौ स्तः।<br>**ग्रामं** निकषा नदी वहति।<br>अहं **मित्रेण** सह गच्छामि।<br>पुत्री **मात्रा** सह क्रीडति।<br>सः **मित्रेण** सह आलपति।<br>बालकः **जनकेन** सह आपणं गच्छति।<br>**कोलाहलेन** अलम्।<br>**बालकेभ्यः** मोदकं रोचते।<br>शिक्षकः **छात्राय** पुस्तकं ददाति।<br>**आचार्याय** नमः।<br><br>3. पाठे प्रयुक्त-सन्धियुक्तपदानि अर्थपूर्णरीत्या पृथक् कर्तुं निर्दिशेत्।<br>तत्र प्रथमं विभक्त्यन्त-पदानामेव विच्छेदः कार्यः। यथा –<br>आगतोऽस्मि = आगतः + अस्मि<br>एह्येहि = एहि + एहि<br>अशस्त्रः + अयम् = अशस्त्रोऽयम्।<br>4. समासगत-सन्धिस्थलानां विच्छेदः अर्थस्पष्टीकरणार्थं कारयेत्, यथा –<br>विद्यालयः = विद्या + आलयः<br>सूर्योदयः –सूर्य + उदयः<br>देवेन्द्रः = देव + इन्द्रः<br>5. सन्धिनियमान् अवबुध्य छात्रः स्ववाक्यरचनासमये यत्र यत्र सन्धिनियमस्य अवसरः स्यात् तत्र तत्र स्वयं सन्धिं कुर्यात्।<br>**बालकोऽयं** चतुरः।<br>**यद्यपि** सः मेधावी **तथापि**<br>परिश्रमं न करोति।<br>कृदन्ताः - अहंग्रामंगन्तुम्उद्यतः।<br>माताफलानिआदायमातुलगृहंयाति।<br>6. पाठेषुप्रयुक्तानांप्रत्यययुक्तपदानांविभागंकर्तुंछात्रान्निर्दिशेत्।<br>तादृशान्अन्यप्रयोगान्चअन्वेष्टुंप्रयोक्तुंचमार्गदर्शनंकुर्यात्। यथा - |

| | | |
|---|---|---|
| | | कृदन्ताः - अहंग्रामंगन्तुम्उद्यतः।<br>माताफलानिआदायमातुलगृहंयाति।<br>गच्छन्पिपीलिकोयातियोजनानांशतान्यपि।<br>ह्रियमाणांसीतांजटायुःअपश्यत्।<br>कालस्यकुटिलागतिः।<br>बालकोऽयं चतुरः।<br>यद्यपि सः मेधावी तथापि परिश्रमं न करोति।<br>बालकःपठित्वागृहंगच्छति।<br>तद्धितान्ताः–संस्कृतमयंवातावरणंनिर्मामः।<br>बुद्धिमान्सर्वत्रपूज्यते।<br>विद्वत्वंचनृपत्वंचनैवतुल्येकदाचन।<br>गुणिनःजनाःसर्वत्रआद्रियन्ते।<br>लघुतमांमञ्जूषाम्आदायबालिकानिरगच्छत्।<br>भीम-दुर्योधनयोःभीमःबलवत्तरः।<br>स्त्री-प्रत्ययान्ताः–निर्धनावृद्धान्यवसत्।<br>आरम्भगुर्वीक्षयिणीक्रमेणलघ्वीपुरावृद्धिमतीचपश्चात्।<br>7. पाठेषुप्रयुक्तानांउपसर्गयुक्तपदानांधातूपसर्गयोः मेलनेनकथंधात्वर्थेपरिवर्तनंभवतीतिछात्रान्निर्दिशेत्। तादृशान्अन्यप्रयोगान्चअन्वेष्टुंप्रयोक्तुंचमार्गदर्शनंकुर्यात्।यथा -<br>बालिकाविद्यालयंगच्छति।<br>बालकःविद्यालयतःगृहम्आगच्छति।<br>सर्पःबिलान्निर्गच्छति।<br>सःविदेशात्प्रत्यागच्छति।<br>सःउद्यानेविहरति।<br>आरक्षकःअपराधिनंप्रहरति।<br>8. पाठेषु आगतानां समस्तपदानामर्थम् अवबोध्य समानप्रकृतिकैः अनेकैश्च उदाहरणैः समासः शिक्षणीयः। समासगतानां समस्तपदानां विग्रहं प्रदर्श्य समासं विग्रहं च शिक्षयेत्।यथा–विद्याधरपतिः वसतिः स्म। (विद्याधराणां पतिः)<br>तस्य गृहोद्याने कल्पतरुः आसीत्। (गृहस्य उद्याने)<br>पितरौ/माता-पितरौ नगरं गच्छतः। (माता च पिता च)<br>पञ्चवट्यां सीता दीर्घकालम् न्यवसत्। (पञ्चानां वटानां समाहरः)<br>9. शिक्षकः पाठस्य अभिमुखीकरणसमये स्रोतोग्रन्थस्य विषये तस्य लेखकस्य च विषये तथ्यानि संकलय्य वर्णनं कुर्यात्।<br>यथा –जननी तुल्यवत्सला (महाभारतम्) |



| | | |
|---|---|---|
| | | प्राणेभ्योऽपि प्रियः सुहृत् (स्रोतः –मुद्रारक्षसम्, लेखकः - विशाखदत्तः)<br>शुचिपर्यावरणम् (ग्रन्थः –लसल्लतिका, रचनाकारः –हरिदत्तः शर्मा)<br>10. शिक्षकः एकमेव वाक्यं द्वित्रैः प्रकारैः वदेत्। तदनुगुणं च अभ्यासं कारयेत्। तद्यथा - बालकः पुस्तकं पठति।<br>बालकेन पुस्तकं पठ्यते। मोनिका लेखं लिखति।<br>राधया लेखः लिख्यते। बालिका गीतां पठति।<br>बालिकया गीता पठ्यते।<br>11. शिक्षकः कालवाचकपदानां शिक्षणसमये एक तः द्वादशसंख्या पर्यन्तं पुनः स्मारयित्वा उदाहरणमाध्यमेन सपाद-सार्द्ध- पादोनादीनां शिक्षणं कारयेत्। तद्यथा–<br>अधुना कः समयः? दशवादनम्।<br>भवान् कति वादने विद्यालयं आगच्छति?<br>अहं सार्द्ध-सप्तवादने विद्यालयं आगच्छामि?<br>पादोन-अष्टवादने वयं विद्यालय-प्रांगणे एकत्रिताः भवामः।<br>सपाद-अष्टवादने कक्षा आरभ्यते।<br>12. पाठेषु प्रयुक्तानां प्रमुख-अव्ययानामर्थावबोधं कुर्यात्। छात्राः यथा वाक्येषु तेषां प्रयोगं कुर्युः तदनुगुणं अभ्यासं कारयेत्। तद्यथा –<br>अहं नूनं संस्कृतसम्भाषणं करिष्यामि।<br>भवान् कुतः भयात् पलायितः?<br>तव पुनःतत्र गतस्य सा सम्मुखम् अपि ईक्षते यदि, तर्हि त्वया अहं हन्तव्यः इति।<br>13. शिक्षकः बहूनि उदाहरणानि दत्त्वा विभक्ति-वचन-काल-लिंगानि अवबोधयेत्। यथा –<br>बालकः पुस्तकालयात् पुस्तकं स्वीकरोति।<br>वयं लेखन्या लिखामः।<br>सः वृक्षात् फलानि चिनोते।<br>सा नद्याः तीरे भ्रमति।<br>माता शिशुं लालयति।<br>अहं ह्यः ग्रामम् अगच्छम्।<br>पिता श्वः विदेशं गमिष्यति। |